"त्यज संसारमसारं भज शरणं पार्व्वतीरमणम्।
विश्वसिहि श्रुतिशिखरं विश्वमिदं तव निदेशकम्॥")

रक्षणम्। वधः। इति मेदिनी॥ घातकः। इति शब्दरत्नावली॥

शरणा, स्त्री, प्रसारणी। इति शब्दरत्नावली॥

शरणागतः, त्रि, (शरणमागतः प्राप्तः।) शरणापन्नः। तत्पर्य्यायः। शरणार्पकः २ अभिपन्नः ३ शरणार्थी ४। इति त्रिकाण्डशेषः॥ तद्रक्षणारक्षणयोः गुणदोषौ यथा,—

"शत्रुहीनञ्च भीतञ्च दीनञ्च शरणागतम्।
यो न रक्षत्यधर्म्मिष्ठः कुम्भीपाके वसेद्युगम्॥
राजसूयशतानाञ्च रक्षिता लभते फलम्।
परमैश्वर्य्ययुक्तश्च धर्म्मेण स भवेदिह॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५५ अध्यायः॥*॥

अपि च।

"शरणागतरक्षां यः प्राणैरपि धनैरपि।
कुरुते मानवो ज्ञानी तस्य पुण्यं निशामय॥
सर्व्वपापविनिर्म्मुक्तो ब्रह्महत्यासुखैरपि।
आयुषोऽन्ते व्रजेन्मोक्षं योगिनामपि दुर्लभम्॥"

इति पाद्मे क्रियायोगसारे गङ्गामाहात्म्यं नाम ८ अध्यायः॥ अन्यच्च।

"लोभाद्द्वेषाद्भयाद्वापि यस्त्यजेत् शरणागतम्।
ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः॥
शास्त्रेषु निष्कृतिर्दृष्टा महापातकिनामपि।
शरणागतहन्तुस्तु न दृष्टा निष्कृतिः क्वचित्॥"

इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः॥

शरणार्थी, [न्] त्रि, (शरणं अर्थयते इति। अर्थ+णिनिः।) शरणागतः। इति हेमचन्द्रः॥ (यथा, महाभारते। १।१६२।१०।

"आगतस्य गृहं त्यागस्तथैव शरणार्थिनः।
याचमानस्य च वधो नृशंसो गर्हितो बुधैः॥")

शरणार्पकः, त्रि, (शरणार्थमर्पयति आत्मानमिति। अर्प+ण्वुल्।) शरणापन्नः। इति त्रिकाण्डशेषः॥

शरणिः, स्त्री, पन्थाः। इत्यमरः॥ सरन्त्यनयेति सरणिः नाम्नीति अनिः इदन्तात् पक्षे ङीपि सरणी च।

"सरणिः श्रेणिवर्त्मनोरिति द्वन्द्वादौ रभसः।"

शॄ स्तॄ गि हिंसने इत्यस्मात् पूर्व्ववदनौ शरणिस्तालव्यादिश्च। शुभं शुभे प्रदीप्ते च शरणिः पथि धावनाविति तालव्यादावजयः। इति तट्टीकायां भरतः॥ पृथ्वी। इत्यजयः॥ (हिंसा। यथा, ऋग्वेदे। १।३१।१६।

"इमामग्ने शरणिं मीमृषो नः।"

"हे अग्ने नो ऽस्मत्सम्बन्धिनीं इमामिदानीं सम्पादितां शरणिं हिंसां व्रतलोपरूपां मीमृषः क्षमस्व * * * शरणिं शॄ हिंसायामित्यस्मादौणादिकः अनिः प्रत्ययः।" इति तद्भाष्ये सायणः॥)

शरणी, स्त्री, (शरणि+वा ङीष्।) पन्थाः। प्रसारणी। इति शब्दरत्नावली॥ जयन्ती। इति शब्दचन्द्रिका॥

शरण्डः, पुं, पक्षी। कामुकः। इति शब्दरत्नावली॥ धूर्त्तः। शरटः। भूषणभेदः। इति मेदिनी॥ चतुष्पात्। इति संक्षिप्तसारोणादिवृत्तिः॥

शरण्यः, त्रि, (शृणाति भयमिति। शॄ हिंसायाम्+"शॄरन्योश्च।" उणा० ३।१०१। इति अन्यः। यद्वा, शरणमिव। शरण+"शाखादिभ्यो यः।" ५।३।१०३। इति यः।) रक्षाकर्त्ता। यथा,—

"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ते चरणारविन्दम्॥"

इति श्रीभागवतम्॥

शरण्या, स्त्री, (शरण्य+टाप्।) दुर्गा। यथा,—

"विषाग्निभयघोरेषु शरण्यं स्मरणाद्यतः।
शरण्या तेन सा देवी पुराणे परिपठ्यते॥"

इति देवीपुराणे देवीनिरुक्ताध्यायः॥

शरण्युः, पुं, वारिदः। वातः। इति विश्वः॥ भरण्युः। इति शब्दमाला॥

शरत्, [द्] स्त्री, (शॄ हिंसायाम्+"शॄदृभसोऽदिः।" उणा० १।१२९। इति अदिः।) वत्सरः। (यथा, रघुः। १०।१।

"पृथिवीं शासतस्तस्य पाकशासनतेजसः।
किञ्चिदूनमनूनर्द्धेः शरदामयुतं ययौ॥")

ऋतुविशेषः। स चाश्विनकार्त्तिकमासद्वयात्मकः। इत्यमरः॥ तत्पर्य्यायः। शारदा २ कालप्रभातः ३। इति शब्दरत्नावली॥ कालप्रभातम् ४। इति त्रिकाण्डशेषः॥ वर्षावसानः ५ मेघान्तः ६ प्रावृड़त्ययः ७। (यथा, रघुः। ४।२४।

"सरितः कुर्व्वती गाधाः पथश्चाश्यानकर्द्दमान्।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत्॥")

तत्र जलगुणाः।

"वर्षासु नाभसं वारि सेवतोद्भिदमेव वा।
सर्व्वं शरदि हेमन्ते तड़ागं सारसन्तु वा॥"*॥

तत्र ग्राह्यवायुर्यथा,—

"वसन्ते दक्षिणो वातो भवेत् वर्षासु पश्चिमः।
उत्तरः शारदे काले पूर्व्वो हेमन्तशैशिरे॥"

इति राजनिर्घण्टः॥*॥

अपि च।

"शारदस्यानभिष्यन्दि लघु तत्परिकीर्त्तितम्।
हैमन्तिकं जलं स्निग्धं बल्यं वृष्यं हितं गुरु॥"

इति राजवल्लभः॥*॥

वैद्यकमते भाद्राश्विनमासात्मकः। केचित्तु।

"ऋतुषट्कं समाख्यातं रवे राशिषु संक्रमात्॥
ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृट् मिथुनकर्कटौ।
सिंहकन्ये स्मृता वर्षा तुलावृश्चिकयोः शरत्।
धनुर्ग्राहौ च हेमन्तो वसन्तः कुम्भमीनकौ॥"

अन्ये तु।

"शिशिरः पुष्पसमयो ग्रीष्मो वर्षा शरद्धिमः।
माघादिमासयुग्मैः स्युर्ऋतवः षट् क्रमादमी॥"

तस्या गुणाः।

"शरद्गुणा पित्तकर्त्री नृणां मध्यबलावहा।"

इति भावप्रकाशः॥*॥

तत्र जातफलम्।

"नरः शरत्संज्ञकलब्धजन्मा
भवेत् सुकर्म्मा मनुजस्तरस्वी।
शुचिः सुशीलो गुणवान् सुमानी
धनान्वितो राजकुलप्रपन्नः॥"

इति कोष्ठीप्रदीपः॥*॥

तत्र वर्णनीयानि यथा। चन्द्रपटुता। रविपटुता। जलशुष्कता। अगस्त्यः। हंसः। वृषः। सर्पः। सप्तच्छदः। पद्मम्। श्वेतमेघः। धान्यम्। शिखिपक्षमदपातः। इति कविकल्पलता॥

शरत्कामी, [न्] पुं, (शरदि शरत्काले कामयते कुकुरीमिति। कम+णिङ्+णिनिः।) कुकुरः। इति शब्दरत्नावली॥

शरत्पद्मं, क्ली, (शरदः पद्मम्।) सिताम्भोजम्। इति राजनिर्घण्टः॥

शरत्पर्व्व, [न्] क्ली, (शरदः पर्व्व।) कोजागरपूर्णिमा। यथा,—

"कोजागरः शरत्पर्व्व शारदी द्यूतपूर्णिमा।"

इति जटाधरः॥

शरत्पुष्पं, क्ली, (शरदः पुष्पम्।) आहुल्यम्। इति राजनिर्घण्टः॥ शरदुद्भवकुसुमञ्च॥

शरद्, स्त्री, (शॄ+अदिः।) शरत्। इत्यमरः॥

शरदन्तः, पुं, (शरदः तदाख्य-ऋतोरन्तो यस्मात्।) हेमन्तः। इति राजनिर्घण्टः॥

शरदा, स्त्री, वत्सरः। शरदृतुः। इति शब्दरत्नावली॥

शरदिजं, त्रि, (शरदि जायते यत्। जन+डः। "प्रावृट्शरत्कालदिवां जे।" ६।३।१५। इति सप्तम्या अलुक्।) शरत्कालजातम्। यथा,

"नद्यः प्रावृषिजास्तु पीनसकफश्वासार्त्तिकाशप्रदाः
पथ्या वातकफापहाः शरदिजा हेमन्तजा बुद्धिदाः।
सन्तापं शमयन्ति संविदधते शैशिर्य्यवासन्तजास्तृष्णादाहवमिश्रमार्त्तिशमदा ग्रीष्मे यथास्वं गुणाः॥"

इति राजनिर्घण्टः॥

शरदुदाशयं, क्ली, शरत्कालीनसरोवरम्। यथा,—

"शरदुदाशये साधुजातसत्-
सरसिजोदरश्रीमुषा दृशा।
सुरतनाथ तेऽशुल्कदासिका
वरद निघ्नतो नेह किं वधः॥"

इति श्रीभागवते। १०।३१।२॥

शरदुदाशये शरत्कालीनसरसि। इति श्रीधरस्वामी॥

शरधिः, पुं, (शरा धीयन्तेऽस्मिन्निति। शर+धा+"कर्म्मण्यधिकरणे च।" ३।३।९३। इति किः।) तूणः। इति हेमचन्द्रः॥ (यथा, राजेन्द्रकर्णपूरे। ३३।